ॐ

ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskrta Academy

**Recognised in the UGC-CARE List**

**A National Peer-Reviewed Research Journal**

विश्वविद्यालय–अनुदान–आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**Volume : XVIII**

**July to December - 2021**

*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**

Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVIII : July to December – 2021

# इन्द्रियविमर्शः

डा. भास्कर भट्टः जोशि
विभागाध्यक्षः, न्याय-वैशेषिकविभागः
कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गलूरु

प्रत्यक्षप्रमाकरणं प्रत्यक्षमिति सर्वसम्मतं लघुलक्षणं भवति। ततश्च प्रत्यक्षप्रमा च सैवोच्यते या इन्द्रियसंनिकर्ष जन्या भवति। इन्द्रियात्मकं प्रमाणं प्रत्यक्षमिति प्रस्थानरत्नाकरे प्रमाणपरिच्छेदे वल्लभमतानुयायिनः। दोषदुष्टे-न्द्रियवारणाय प्रमाणमिति, शब्दादिवारणाय इन्द्रियेति च पदद्वयम्। शाब्दिकानां मते इन्द्रियार्थसंनिकर्षजन्या या बुद्धिवृत्तिः सा, तत्प्रतिबिम्बितं चैतन्यं वा प्रत्यक्ष-प्रमा, तत्करण प्रत्यक्षं प्रमाणमिति लक्षणं लघुमञ्जूषायां बौद्धार्थस्य वाच्यत्वनिरूपणावसरे प्रसङ्गात् प्रतिपादितम्। एवं सांख्ययोगदर्शनयोः इन्द्रिय-प्रणालिकया चित्तस्य बाह्यवस्तु परागात् तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणमिति योगसूत्रव्यासभाष्ये साधितम्।

**इन्द्रियविमर्शः**

चार्वाकास्तु अहं पश्यामि, अहं श्रुणोमीति प्रतीतिबलात् इन्द्रियाण्येव चेतयन्ते तानि गोलकादिलक्षणानीति। पृथिव्यप्तेजोवायुरिति तत्वानि, तत्समुदाये शरीरेन्द्रियविषयसंज्ञेति बार्हस्पत्यसूत्रम्।अश्नुते विषयमित्यक्षमिन्द्रियमिति, इन्दति-परमैश्वर्यं अनुभवतीति इन्द्र आत्मा, इन्द्रस्य लिङ्गमिन्द्रियमिति व्युत्पत्तिं प्रदर्श्य जैनाः इन्द्रियद्वैविध्येन लक्षणं द्विविधं १ स्वीकुर्वन्ति-तत्र द्रव्येन्द्रियम्- गोलकादि परिणामविशेषपरिणत रूपरसगन्धस्पर्शवत्पुद्गलात्मकम्। भावेन्द्रियन्तु लब्ध्युपयो-गात्मकम्। आवरणक्षयोपशमप्राप्तिरूपार्थग्रहण शक्तिर्लब्धिः। तदभावे सतोऽप्यर्थ-स्याप्रकाशनात् २ इति। इन्द्रियाणां स्वरूपमणुतमम् अतीन्द्रियमनित्यम् चिरस्थायि विकारिचेति प्रमेयरत्नाकस्य प्रमेयप्रकरणे प्रतिपादितम्। सात्त्वकाहङ्कारोपादान-कत्वमिन्द्रियसामान्य लक्षणं सांख्यनये। "अत्मलिङ्गत्वस्य तत्वे तु महदहङ्कार-योरप्यतिप्रसङ्गस्स्यात् तस्माद् व्युत्पत्तिमात्रं तद् यथा गच्छतिति गौरिति।

१. प्रमेयरत्नमालायाम्, २-५ । २. प्रमेयकमलमार्ताण्डे प्रमाणपरिच्छेदे, २-५ ।

"उभयमप्येतद् इन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते" इत्युक्त्या उभयविधेन्द्रियाणामसाधारणं लक्षणमिति ज्ञायते। त्वगेव बुद्धीन्द्रियम्, तच्च त्वगिन्द्रियं शरीरव्यापि, तत्सत्वे एव विषयग्रहणं भवतीति त्वगेवैकेन्द्रियमिति एकेद्रियवादः, इन्द्रियाणि विभूनि, न भौतिकानि, सात्विकाहङ्कारोपादानत्वमिन्द्रियत्वमिति च सांख्या इति पदार्थरत्नमालायाम्। न्यायसिद्धान्तमञ्जरीव्याख्यायाञ्च दृश्यते। सोऽयमेकेन्द्रियवादः अन्धेषु व्यभिचाराद् दुष्ट इति न्यायभाष्ये वार्तिके च खण्डितः। लब्धित्वमात्रं तावदिन्द्रियमिति प्रमाणमीमांसायाम्। इन् इति विषयाणां नाम, तान् इनः विषयान् प्रति द्रवन्ति गच्छन्ति अथवा तान् विषयान् द्रावयति-गमयतीति इन्द्रियमिति व्युत्पत्तिरपि प्रमाणमीमांसायां सांख्यकारिका-माठरवृत्तौ ३ च प्रदर्शिता।

आलोचनज्ञानासाधारणकारणत्वमिन्द्रियत्वमिति, इन्द्रं कार्यकारणस्वामिनं जीवभावापन्नं परमेश्वरं आनन्दयति भोगैः प्रीणयतीति इन्द्रियमिति च वेदान्तिनां मते स्वरूपं वक्तव्यम्। वर्तमानमात्रविषयग्राहित्वमिति लक्षणं वेदान्तपरिभाषा प्रकाशिकायां दृश्यते। सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रयमतीन्द्रियमिति भवति लक्षणम्। शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियमिति लक्षणं कर्मेन्द्रियेष्वव्याप्त मितियतीन्द्रियमतदीपिकायाम्। साक्षात्कारप्रतीतिसाधनमिन्द्रियमिति प्रमाणमञ्जरी। मध्वमतानुयायिनस्तु प्रमातृप्राकृतभेदेन इन्द्रियं द्विविधम्।प्रमात्रिन्द्रियस्यैव प्रकृतिपरिणामाहङ्कारपञ्चभूतांशैरुपचितं साक्षीति नामान्तरम्। आन्मस्वरूपम्, तद्धर्माः सुखादयः, भावरूपाज्ञानम्, मनः, मनोवृत्तयः, बाह्योन्द्रियज्ञानसुखाद्याः कालः, दिक्, आकाशः, प्रामाण्यादयश्च प्रमात्रिन्द्रियस्य विषयाः। घ्राण-रसन-चक्षुस्त्वक्-श्रोत्र-मनोरूपं प्राकृतमिन्द्रियमित्युच्यते। काचकामलादयः इन्द्रियनिष्ठ - समीचीनज्ञानानुकूलशक्तिविघटकाः प्राकृतेन्द्रियाणां दोषाः। तच्च प्राकृतेन्द्रियं दैवासुरमध्यमभेदेन त्रिविधम्। तेषु यथार्थज्ञानजनकं दैवमिन्द्रियम्। अयथार्थ-ज्ञानजनकमासुरमिन्द्रियम्। अभयविधज्ञानजनकं मध्यममिति वदन्ति। वैय्याकरणानां दर्शने तु महदहङ्कारचेष्टाभिन्नत्वे सति प्रत्येकं जीवच्छरीरमात्मतत्त्वानु-

---

३. १-१-२३, सां. कारिका, २६

मापकमिन्द्रियमिति इन्द्रियसामान्यलक्षणं वक्तव्यम्। इन्द्रियाणां नियमेन स्वाधिष्ठानवृत्तिगुणग्राहकत्वमिति वा लक्षणं वक्तव्यम्। परमिदं न कर्मेन्द्रियसामान्यम् परन्तु ज्ञानेन्द्रियस्यैव। सूचितञ्चेदं "इन्द्रियमिन्द्रलिङ्ग-मित्यादिसूत्रे ४ पाणिनिना। तत्र इन्द्र-आत्मा तस्य लिङ्गं ( ज्ञापकम्) करणेन कर्तुरनुमानादिति व्याख्यातं सिद्धान्तकौमुदीग्रन्थे। महत्तत्वे अहन्तत्वे चेष्टायाञ्च अतिव्याप्ति- वारणाय सत्यन्तदलम्। एवं सांख्यमतेऽपीति पूर्वमुक्तम्। सांख्यमत इव शाब्दिकानां मतेऽपि एकादशेन्द्रियवादः।

भोगसाधनानि, स्वविषयग्रहणलक्षणानि च इन्द्रियाणि इति वात्स्यायनभाष्ये दृश्यते। करणस्वभावकानि इन्द्रियाणि, स्वविषयग्रहणलक्षणत्वमिन्द्रियाणामिति ५ च न्यायवार्तिके विद्यते। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमन-स्संयोगा श्रयत्वमिन्द्रियत्वमिति न्यायलीलावत्याम्, वादिविनोदे, लीलावती-कण्ठाभरणे मुक्तावल्याम्, लक्षणराजौ च लक्षितम्। शब्दादितरे प्रत्यक्ष-सन्निकर्षवत्तापादनविषया ये विशेषगुणा रूपादयः सुखादयश्च तेषामनाश्रयत्वे सति ज्ञानस्यासाधारणकारणं य इन्द्रियसंयोगः तदाश्रयत्वमिति तदर्थः। आत्मन्य-तिव्याप्तिवारणाय शब्देतरेति। चक्षुरादौ अव्याप्तिवारणाय उद्भूतेति। कालादा-वतिव्याप्तिवारणाय ज्ञानकारणमनस्संयोगाश्रयत्वमिति। परन्तु लक्षणेऽस्मिन् विशेषपदवैयर्थ्यम् चक्रकापत्तिञ्चोद्भाव्य लक्षणराजौ साक्षात्कारत्वव्याप्यजात्य-वच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति द्रव्यत्वमिन्द्रियत्वमिति लक्षणा-न्तरमुपवर्णितम्। अत्रापि आत्मन्यतिव्याप्तिवारणाय सत्यन्तम्। चक्षुर्घट-संयोगेऽतिव्याप्तिवारणाय द्रव्यत्वमिति चोपात्तम्। विषयोपलब्धिकारणत्वमि-न्द्रियत्वमिति न्यायमञ्जरी।एवं पदार्थचन्द्रिकायां "साक्षात्कारमात्रवृत्तिधर्मा-वच्छिन्नकार्यतानिरूपितकारणताश्रयव्यापारवदतीन्द्रियमिति"६ लक्षणं दृश्यते। शरीरा -श्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रियमिति ७ लक्षणं न्यायकन्दल्याम्, शरीर-

---

४. पा. सू., ५-२-९३ ।

५. न्या. वा., १-१-१२ ।

६. प. च. ।

७. न्या. क. पृ.

योगे सत्येव साक्षात्प्रमितिसाधनं इन्द्रियमिति तार्किक- रक्षायाम्, शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियमिति ८ तर्ककौमुद्याम्, तर्कभाषायाञ्च दृश्यते। आलोकादौ अतिव्याप्तिवारणाय अतीन्द्रियमिति कालादावतिव्याप्तिवारणाय ज्ञानकारणमिति इन्द्रियार्थसंनिकर्षेऽतिव्याप्तिवारणाय शरीरसंयुक्तमिति पदानि। आत्मान्यत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वम्, स्पर्शोपलब्धिसाधनमिन्द्रियम्, सुखदुःखानुकूलसाक्षात्कारप्रमितिक्रियान्यतरकरणमतीन्द्रियमिति लक्षणानि लक्षणराजौ विद्यन्ते।

आलोकेऽतिव्याप्तिवारणाय अतीन्द्रियमिति, धर्मादावतिव्याप्तिवारणाय सुखदुःखानुकूलेति अनुमित्यादिकरणेऽतिव्याप्तिवारणाय साक्षादिति पदानि निवेशितानि। शरीरसंयुक्तमतीन्द्रियं साक्षात्प्रतिसाधनमिन्द्रियमिति लक्षणमनूद्य तर्कसंग्रहे आनन्दज्ञानेन खण्डितम्। स्मृत्यजनकज्ञानहेतु मनस्संयोगाश्रयत्वमिन्द्रियत्वमिति ९ लक्षणं तत्वचिन्तामणौ पदार्थरत्नमालायाम्, वैशेषिकोपस्कारे कणादसिद्धान्तचन्द्रिकायाञ्च दृश्यते। ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानं इन्द्रियसत्वे प्रमाणमिति नैयायिकाः। तैजसाहङ्कारोपादेयत्वे सति ज्ञानक्रियान्यतरकरणमिन्द्रियमिति, देहसंयुक्तत्वे सति स्वफलेनात्मज्ञापकत्वं वा इन्द्रियत्वमिति च इन्द्रियसामान्यलक्षणमिति वल्लभमतानुयायिनः इति प्रमाणरत्नाकरे दृश्यते।

घरट्टयन्त्रादिक्रियाजनकवाय्वादिवारणाय प्रथमलक्षणे सत्यन्तम्, प्राणबुद्धिवारणाय शेषमिति वदन्ति। तच्चेन्द्रियं अणुतममतीन्द्रियमनित्यं चिरस्थायि विकारि चेति वाल्लभाः प्रमाणरत्नाकरे प्रमेयप्रकरणे वर्णयन्ति। यत् सम्प्रयुक्तेऽर्थे विशदावभासं ज्ञानं जनयति तदिन्द्रियमितिमीमांसकाः। गोलकानां दृश्यत्वात् इन्द्रियाणां ऐन्द्रियकत्वमपि न।छिन्नकरणस्य शब्दश्रवणानुपपत्तेः, नष्टलिङ्गचक्षुषः अचाक्षुषापत्तेश्च। अतश्च रूपाद्युपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावत् इत्यनेन इन्द्रियाणां करणत्वेन रूपेण सिद्धौ गौलकं न करणम्। उक्तरीत्या अन्वयव्यतिरेकव्यभिचारात् इत्येवं गोलकातिरिक्तेन्द्रियसिद्धौ तस्यातीन्द्रियत्वमप्यवसीयते इति प्रक्रिया।

---

८. त. कौ., पृ.  ९. त. चि., पृ. ५८७, तिरुपति

इन्द्रियाणि विभूनि नभौतिकानीति१० सांख्यसिद्धान्तः परन्तु न्यायवार्तिके सर्वाणि इन्द्रियाणि भौतिकानि अतीन्द्रियाणि११चेति सिद्धान्तितम्।

**इन्द्रियविभागविमर्शः**

एकमेवेन्द्रियं न तु नाना इति केषाञ्चिन्मतम्। तच्च त्वगेवैकमिन्द्रियम्। तच्च शरीव्यापि विद्यते। तत्सत्वे एव विषयग्रहणं भवति इति एकेन्द्रियवादः। अस्य वादस्य अन्धेषु व्यभिचारमापाद्य दृष्टता न्यायवार्तिके वर्णिता। प्रमेय-रत्नमालायां परीक्षामुखसूत्रवृत्तौ जैनाः इन्द्रियं द्रव्येन्द्रियभावेन्द्रियभेदाद् द्वि-विधम्। चक्षुरादि द्रव्येन्द्रियं भावेन्द्रियं मनः इति वर्णयन्ति चक्षुश्श्रोत्र-घ्राण-जिह्वा-काय-मनो-भेदेन षडिन्द्रियाणीति बौद्धाः। सांख्ये-योगे-व्याकरणदर्शने च घ्राण-रसनचक्षु-स्पर्शन-श्रवणभेदेन पञ्च ज्ञानेन्द्रियाणि वाक्-पाणि-पाद-पायूपस्थ-भेदेन कर्मेन्द्रियाणि पञ्च, उभयात्मकमिन्द्रियं मन इति इन्द्रियाणि एकादश स्वीकृतानि।स्फुटार्थसिद्धौ विशुद्धिमार्गे च बौद्धाः द्वाविंशतीन्द्रियाणि स्वीकुर्वन्ति-चक्षुस्-श्रोत्र-घ्राण-जिह्वा-काय-मनस्-स्त्री-पुरुष-जीवित-सुख-दुःख-सौमनस्य दौर्मनस्य। उपेक्षा-श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-अनाज्ञातमाज्ञास्यानि-आज्ञा-आज्ञा-तावीन्द्रियमिति च तेषां नाम। जिह्वेन्द्रियमित्यनेन रसनेन्द्रियं वागिन्द्रिय-ञ्चेत्युभयमपि गृह्यते। कायेन्द्रियमिति सकलशरीरव्यापि त्वगिन्द्रियमुच्यते।

उपस्थेन्द्रियेणैव गतार्थतया स्त्रीन्द्रियपुरुषेन्द्रियविभागः, प्राणेनैव जीवि-तेन्द्रियस्य गतार्थताम्, सुख-दुःख-सौमनस्य-दौर्मनस्य-उपेक्षा श्रद्धेन्द्रियाणां मनसा गतार्थताम्, वीर्येन्द्रियस्य कर्मेन्द्रियैः गतार्थताम्, स्मृतीन्द्रियादारभ्य अनाज्ञात-माज्ञास्यामीति इन्द्रियाणां मनसा गतार्थताम्, आज्ञेन्द्रिय-आज्ञातावीन्द्रिययोर्वा-गिन्द्रियेण गतार्थतां स्वीकृत्य पश्चात्तनैर्बौद्धैः जिह्वा-घ्राण-चक्षुश्श्रोत्र-काय-मनो-भेदेन षडिन्द्रियाण्येव स्वीकृतानि।मीमांसकास्तु बाह्यान्तरभेदेन द्विविधानि इन्द्रियाणि। तेषु घ्राण-रसन-चक्षुस्त्वक्-श्रोत्राणि बाह्येन्द्रियाणि, मनस्तु आन्तरम् इन्द्रियं यतः मनः आत्मतद्गुणेष्वेव स्वतन्त्रं प्रवर्तते न बाह्येषु रूपादिषु इति

---

१०. सांख्यसूत्रम्, २/२० । ११. न्या. वा., ३-१-३१ ।

आन्तरमित्युच्यते इति वदन्ति। प्रतिपादितञ्चैतत् शास्त्रदीपिकायां प्रकरणपञ्चिकायाः प्रमाणपारायणे च। अद्वैतवेदान्ते तु इन्द्रियाणि भौतिकानि मध्यमपरिमाणानि ज्ञानेन्द्रियकर्मेन्द्रियभेदेन-भिन्नानि श्रोत्र-त्वक्-चक्षुस्-रसन-घ्राणानि ज्ञानेन्द्रियाणि वाक्पाणिपाद-पायूपस्थाख्यानि मनस्तु न इन्द्रियमिति स्वीक्रियते स्पष्टञ्चेदं वेदान्त-परिभाषादिषु। विशिष्टाद्वैतिनस्तु कर्मेन्द्रिय-ज्ञानेन्द्रियभेदेन द्विविधमिन्द्रियम्, ज्ञानप्रसरण-शक्तं ज्ञानेन्द्रियं मनस्-श्रोत्र-चक्षुस्-घ्राण-रसन-त्वग्भेदेन षडिवधम्, उच्चारणादिषु अन्यतमक्रियाशक्तं कर्मेन्द्रियं वाक्-पाणि-पादपायु-उपस्थभेदेन पञ्चविधमिति स्वीकुर्वन्ति। स्पष्टञ्चेदं यतीन्द्र-मतदीपिकायाम्। द्वैतिनस्तु प्रमातृ प्राकृतभेदेन इन्द्रियं द्विविधम्। प्रमात्रिन्द्रियस्यैव प्रकृतिपरिणामाहङ्कारपञ्चभूतांशै रूपचितं साक्षीति नामान्तरम्। आत्मस्वरूपम्, तद्धर्माः सुखादयः, भावरूपाज्ञानम्, मनः मनोवृत्तयः बाह्येन्द्रियज्ञानसुखादयः, कालः, दिक्, आकाशः, सुखाद्यभावः, प्रामाण्यादयश्च प्रमात्रिन्द्रियस्य विषयाः। घ्राण-रसन-चक्षुस्-त्वक्-श्रोत्र-मनोरूपं प्राकृतमिन्द्रियमि-त्युच्यते। काचकामलादयः इन्द्रियनिष्ठसमीचीनज्ञानानुकूलशक्तिविघटकाः प्राकृते-न्द्रियाणां दोषाः।

तच्च प्राकृतेन्द्रियं दैवासुरमध्यमभेदेन त्रिविधम्। तेषु यथार्थज्ञानजनकं दैवमिन्द्रियम्, अयथार्थज्ञानजनकमासुरमिन्द्रियम्। यथार्थायथार्थज्ञानजनकं मध्यम-मिति वदन्ति। स्पष्टञ्चेदं प्रमाणपद्धत्यां प्रमाणचन्द्रिकायाञ्च। न्यायवैशेषिकदर्शने तु कर्मेन्द्रिय-ज्ञानेन्द्रियभेदेन इन्द्रियाणि द्विधा विभक्तानि। परन्तु कर्मेन्द्रियाणां परिगणनं प्रचीनग्रन्थेषु न दृश्यते। न्यायसूत्रे प्रशस्तपादभाष्ये न्यायवार्तिके वादिविनोदे न्यायमञ्जर्यादौ च ग्रन्थे घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनांसि षडिन्द्रियाण्येव स्वीकृतानि। वैशेषिकैः साधितं मनस इन्द्रियत्वं नैयायिकै-स्स्वीकृतम्। ततश्च-न्यायवैशेषिकदर्शने घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनांसि इति षट् ज्ञानेन्द्रियाण्येव स्वीकृतमिति वक्तव्यम्।

परन्तु सांख्यसूत्रे "उभयमिन्द्रियमिति"१२ कर्मेन्द्रियाणां स्वीकारात्

---

१२. सा. सू., १/६१ ।

न्यायसुत्रेषु तीर्थान्तरकथितकर्मेन्द्रियाणामनिषेधात् पश्चात्तनैस्तेषां स्वीकारोऽपि दृश्यते। कर्मेन्द्रियाणां शरीरावयवत्वेन ग्रहणात् नैयायिकैः पृथक् परिगणनं न कृतमिति वा वक्तव्यम्। ततश्च वाक्-पाणि-पाद-पायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि, वचन-आदान-विहरण-उत्सर्ग-आनन्दात्मक-पञ्चविधकार्यसाधनात् तत्कार्यस्य अनितरेतरसाध्यत्वाच्च इन्द्रियत्वमिति वक्तव्यम्।

इन्द्रियाणि प्राप्यकारीणि अप्राप्यकारीणि च द्वेधा विभक्तुं शक्यन्ते। दर्शनेषु इन्द्रियाणां विषयैस्सह संनिकर्षः प्रत्यक्षज्ञानोत्पत्तौ हेतुतया वर्णितः। तत्र इन्द्रियं विषयदेशं गत्वा विषयेण संयुज्य तं प्रकाशयति अथवा विषयस्यैव इन्द्रियदेशे आगमने सति तेन संयुज्य तं प्रकाशयति वा इति जिज्ञासाविषयेऽस्मिन् दर्शनकाराणां विभिन्ना आशायाः दृश्यन्ते। अत्र स्फोटवादिनो वैयाकरणाः वदन्ति- तेजोरूपं चक्षुरिन्द्रियं विषयदेशं गत्वैव विषयेण संयुज्य तं प्रकाशयति। अत्र तेजसा दीपादिना चक्षुषः संस्कारे प्राप्यकारिता कारणम् उक्तम्। यतो हि सन्तमसे स्थितोऽपि पुरुषः आलोकानुगृहीतेन चक्षुषा घटादिविषयं पश्यति। यदि चक्षुरिन्द्रियं प्राप्यकारि न स्यात् तर्हि तस्य दृष्टपुरुषनयनगोलकस्थतया कथं बाह्यं विषयं पश्येत्[१३] ? इति वाक्यपदीये ब्रह्मकाण्डे प्रतिपादितम्। परन्तु लघुमञ्जूषायां शक्त्याश्रयशब्दनिरूपणावसरे सर्वेषामिन्द्रियाणां प्राप्यकारित्वमुपवर्णितम्।

तत्र आकाशाधिष्ठानक - आहङ्कारिको धर्मविशेषः श्रोत्रेन्द्रियमिति[१४] सांख्योक्तं पक्षं आदृत्य प्रत्यक्षक्रमो वर्णितः तदैकरूप्याय घ्राणादीनीन्द्रि- याण्यपि पृथिवीजलतेजोवाय्वधिष्ठानकानि आहङ्कारिकाण्येव स्वीकृतानि। आहङ्कारिकस्यान्तःकरणपरिणामत्वात् अन्तःकरणस्य बहुदूरदेशगमनानुभवेन तद्विकाराहङ्कारविशेषाणां सर्वेषामिन्द्रियाणां तत्सम्भवेन प्राप्यकारित्वं अभ्युपगतम्।परन्तु श्रोत्रेन्द्रियं न प्राप्यकारीति वैयाकरणानामाशयः। तेषां मते श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकं च पुनराकाशमिति स्वीक्रियते। ततश्च शब्दस्य आकाशदेशत्वं स्वीकृतम् ततश्च कर्णशष्कुल्यवच्छिन्ननभःप्रदेशस्यैव श्रोत्रेन्द्रियत्वं सिद्धम्।

---

१३. वाक्यपदीयम्, ब्र. का. ।

१४. सां. का., ३६-३७, सांख्यतत्त्वकौमुदी ।

तच्च स्वदेशे समुत्पन्नं शब्दं ध्वन्यात्मकं गृह्णातीति श्रोत्रेन्द्रियस्य अप्राप्यकारित्वं लघुमञ्जूषायां शक्त्याश्रयनिरूपणावसरे प्रतिपादितम्। धर्मविशेषविशिष्टस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य श्रोत्रत्वस्वीकारात् बाधिर्याद्युपपत्तिरिति चोक्तम्।

एवञ्च चक्षुरिन्द्रियं विहाय अन्यानि ज्ञानेन्द्रियाणि श्रोत्रवत् अप्राप्यकारीणि एवेति स्वीकर्तव्यम्। इन्द्रियाणां प्राप्यकारित्वमेव न्यायदर्शने स्वीकृतम्। तत्र प्राप्यविषयेण संयुज्य इन्द्रियेण क्रियते ज्ञानमित्येव तात्पर्यम्। न तु विषय देशगमने। चक्षुषस्तैजसत्वेन तस्यैव तत्र सामर्थ्यम्[१५]। प्रतिपादितञ्चेदं इन्द्रियपरीक्षाप्रकरणे न्यायसूत्रेषु न्यायवार्तिके एवं न्ययमञ्जार्यां अष्टमाह्निके च।योगदर्शने अपि सांख्यदर्शनवत् विषयदेशं प्राप्यैव तज्ज्ञापकतेति सिद्धान्तः व्यासभाष्ये वर्णितः। पूर्वोत्तरमीमांसयोश्च इन्द्रियाणां प्राप्यकारित्वमेव स्वीकृतम् [१६]। उक्तञ्चेदं शाबरभाष्ये एवं वेदान्तपरिभाषायाः प्रत्यक्षप्रकरणे च।

विशिष्टाद्वैतदर्शने द्वैतदर्शने च इन्द्रियाणां प्राप्यप्रकाशकारित्वमेव सिद्धान्तितम् (यतीन्द्रमतदीपिकायां प्रमाणचन्द्रिकायाञ्च)। जैनदर्शने चक्षुरतिरिक्तानि चत्वारि घ्राणरसन-त्वक् श्रोत्राणि बाह्येन्द्रियाणि, प्राप्यकारीणि मनस्त्वप्राप्यकारि[१७] इति पक्षः तत्त्वार्थसूत्रे स्वीकृतः। बौद्धदर्शने तु अभिधर्मकोशे घ्राण-रसन-त्वगिन्द्रियाणि त्रीणि प्राप्यकारीणि, चक्षुः-श्रोत्र-मनांसि अप्राप्यकारीणि इति स्वीकृतम्। प्रमाणसमुच्चये चक्षुः श्रोत्रे यदि विषयं प्राप्य गृह्णीतः तदा यदिदं दूरे शब्दः, दूरे अर्थ इति व्यवहितग्रहणं न स्यात्, न स्याच्च अधिकपरिमाणानां पर्वतादीनां ग्रहणम्, प्राप्यकारिषु त्वक् रसनादिषु अस्य नियमस्यादर्शनादिति चक्षुःश्रोत्रयोः अप्राप्यकारित्वं समर्थितम्। ततश्च न्यायमते चक्षुरिन्द्रियस्य प्राप्यकारित्वमन्येषामप्राप्यकारित्वम्। अन्यमते श्रोत्रेन्द्रियं विहाय अन्यानि इन्द्रियाणि प्राप्यकारीणि।

---

१५. न्या. सू., ३-१-३३-५३, न्या. वा., १-१-४ ।

१६. शाबरभाष्ये, १-१-१३ ।

१७. तत्त्वार्थसूत्रे, १-१९ ।

वेदान्तनां मते सर्वाणीन्द्रियाण्यप्राप्यकारीणि इति सिध्यति। तेषु गन्धज्ञान-जनकत्वे सति अतीन्द्रियगन्धवत्वम्, गन्धोपलब्धिसाधनम्, गन्धमात्रग्रहण-शक्तमिन्द्रियम् इति लक्षणानि घ्राणस्य यतीन्द्रमतदीपिकादिषु ग्रन्थेषु निरू-पितानि। घ्राणञ्च नासाग्रवर्ति पार्थिवमिति दर्शनसिद्धान्तः। घ्राणं पार्थितं गुणेषु गन्धस्यैव ग्राहकत्वात् यदेवं तदेवं विततचम्पाकवत् इत्यनुमानं घ्राणस्य पार्थिवत्वे प्रमाणम्।गन्धग्राहकं अश्विदेवताकं घ्राणेन्द्रियमिति१८ वल्लभदर्शनम् । रसोपलब्धि-साधनम्, रसज्ञानजनकत्वे सति अतीन्द्रियत्वम्, रसमात्रग्रहणशक्तम् इन्द्रियम् इति रसनेन्द्रियलक्षणानि दृश्यन्ते। रसनेन्द्रियमाप्यं वरुणदेवता कमिति ज्ञेयम्। रूपमात्रग्रहणशक्तम्, रूपोपलब्धिसाधनम्, रूपज्ञानसाधारणत्वे सति इन्द्रियरूपवत्वं चक्षुरिति चक्षुषो लक्षणानि प्रसिद्धानि। तच्च सूर्यदेवताकं तैजसमिति स्थितिः। चक्षुः तैजसं तेजोविशेषगुणेषु रूपमात्रग्राहकत्वात् यद्यत् रूपमात्रतेजोविशेषगुणग्राहकं तत्तत्तैजसम्, यथा प्रभा तेजस्त्वव्याप्यरूपमात्रतेजोविशेषगुणग्राहकवच्चैतत् तस्मात् तथा इति अनुमानं चक्षुषस्त्वैजसत्वे प्रमाणमिति वादिविनोदे।

शरीरव्यापकं स्पर्शग्राहकम् स्पर्शोपलब्धिसाधनम्, स्पर्शज्ञानजनकत्वे सतीन्द्रियस्पर्शवत्वम्, स्पर्शमात्रग्राहकशक्तमिन्द्रियं त्वगिति लक्षणानि तच्च वायुदेवताकं वायवीयमिति, नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्श-अनुपलम्भ इति च ज्ञायते। शब्दोपलब्धिसाधनम्, शब्दज्ञानजनकत्वे सति शब्दवत्वम्, कर्णशष्कुल्यवच्छिन्नदिग्भागः न तु आकाशः, इति श्रोत्रस्य लक्षणानि। इदञ्च दिग्देवताकमिति ज्ञायते। शब्दादिपञ्चके शब्दमात्रग्रहणशक्तं श्रोत्रं तत् मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्ति द्विजिह्वादीनां नयनवृत्ति इति यतीन्द्रमतदीपिकायाम्। आकाशस्येव श्रोत्रस्यापि नित्यत्वमिति न्यायशास्त्र-विश्वासः। एतेषां इन्द्रियाणां विषयैस्सम्बन्धः क्वचित् संयोगः क्वचित् संयुक्ताश्रयणमिति विवेकः। व्यवहारजनकं वह्निदेवताकमिन्द्रियं वाक्, शिल्पजनकमिन्द्रदेवताकमिन्द्रियं पाणिः, गतिजनकं विष्णुदेवताकमिन्द्रियं पादः, विसर्गजनकं मित्रदेवताकमिन्द्रियं पायुः आनन्दजनकं प्रजापतिदेवताकमिन्द्रियं उपस्थमिति कर्मेन्द्रियाणां लक्षणानि बोध्यानि।

---

१८. प्रस्थानरत्नाकरे, पृ. २१६ ।

## अधारग्रन्थाः


१. प्रमेयरत्नमाला
२. प्रमेयकमलमार्तण्डः
३. सांखकारिका
४. न्यायवार्तिकम्
५. पदार्थचन्द्रिका
६. न्यायकन्दली
७. तर्ककौमुदी
८. तर्ककौमुदी
९. तत्वचिन्तामणिः
१०. शाबरभाष्यम्


**डा. भास्कर भट्टः जोशि (बेङ्गळूरु)**
विभागाध्यक्षः, न्याय-वैशेषिकविभागः
कर्नाटक संस्कृत विश्वविद्यालयः
चामराज पेटे-५६००१८
बेङ्गळूरु, कर्नाटक
Mobile No. : 9742269403
E-mail : joshi.bhat@gmail.com

********